National Journal of
Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2026; 1(66): 75-81
© 2026 NJHSR
www.sanskritarticle.com

शुभ्रजित्पालः
शोधच्छात्रः, व्याकरणविद्याशाखा,
केन्द्रीयसंस्कृतविश्वविद्यालयः,
श्रीसदाशिवपरिसरः, पुरी, ओडिशा

Correspondence:
शुभ्रजित्पालः
शोधच्छात्रः, व्याकरणविद्याशाखा,
केन्द्रीयसंस्कृतविश्वविद्यालयः,
श्रीसदाशिवपरिसरः, पुरी, ओडिशा

# नागेशानुसारं हलन्त्यमिति सूत्रपरिप्रेक्ष्येऽन्योन्याश्रयदोषविमर्शः

**शुभ्रजित्पालः**

**शोधसारः**
नागेशानुसारं हलन्त्यमिति सूत्रेऽन्योन्याश्रयदोषविमर्शः इति शीर्षकं समाश्रित्य प्रस्तूयमाने अस्मिन् शोधपत्रे सिद्धान्तकौमुद्याः प्रामुख्यटीकाग्रन्थेषु अन्यतमं महामतिनागेशविरचितलघुशब्देन्दुशेखर-माधारीकृत्य हलन्त्यमिति सूत्रे अन्योन्याश्रयदोषस्य स्वरूपकथनं तदनु अन्योन्याश्रयदोषनिराकरणाय व्याख्यातानां विकल्पानाम् आलोचनम्, नागेशानुसारं तत्प्रत्याख्यानम्, अन्ते च केषुचित् स्थलेषु अन्योन्याश्रयदोषविषये कैयटस्य मतप्रत्याख्यानम्, भाष्यकारमतञ्च सविस्तारं यथामति प्रतिपादितम्।

**कूटशब्दाः** अन्योन्याश्रयदोषः, कैयटमतम्, सूत्रम्, प्रत्याख्यानम्

## आमुखम्

षड्विधेषु पाणिनीयसूत्रेषु द्विपदात्मकं सूत्रमिदं संज्ञासूत्रम्। अत्र हल् अन्त्यम् इति च छेदः। हलन्त्यमिति सूत्रं पाणिनीयाष्टाध्यायीग्रन्थे एकवारं पठितम्। अष्टाध्याय्याः प्रथमाध्यायस्य तृतीयपादस्य तृतीयं सूत्रं भवति इदम् हलन्त्यम् इति। सिद्धान्तकौमुद्यां सूत्रमिदं द्विवारं पठितम्। अन्योन्याश्रयदोषवारणाय हलन्त्यमिति सूत्रमावर्त्य व्याख्यायते।

एषामन्त्या इतः इति वचनेन चतुर्दशसूत्र्यां णकाराद्यन्तवर्णानामित्संज्ञा भट्टोजिदीक्षितेन प्रतिज्ञाता। एतेषाम् अइउण् इत्यादिसूत्रघटकीभूतणकाराद्यन्तवर्णानाम् इत्संज्ञा हलन्त्यम् इति सूत्रेणैव वाच्या। अत एव सिद्धान्तकौमुदीकारः वैयाकरणशिरोमणिः भट्टोजिदीक्षितः वैयाकरणसिद्धान्तकौमुद्याख्यस्य स्वकीयग्रन्थस्य संज्ञाप्रकरणस्य आदावेव हलन्त्यम् इति सूत्रव्याख्यानमारभते।

## अन्योन्याश्रयदोषविमर्शनम्

तथाहि हलन्त्यम् आदिरन्त्येन सहेता इत्यनयोः परस्परसापेक्षत्वेन अन्योन्याश्रयदोषमाशङ्क्य तद्दोषनिराकरणाय कौमुदीकारेण हलन्त्यम् इति सूत्रं द्विरावृत्त्य प्रथमस्य हलन्त्यम् इति सूत्रस्य हल् इति सूत्रे अन्त्यम् इत् स्यात् इत्यर्थं स्वीकृत्य आदिरन्त्येन सहेता इत्यनेन हल् इति संज्ञासिद्धौ द्वितीयस्य हलन्त्यम् इति सूत्रस्य उपदेशे अन्त्यं हल् इत् स्यात् इत्यर्थो व्याख्यातः।

परस्परापेक्षत्वम् स्वज्ञप्त्यधीनज्ञप्तिकत्वम् वा अन्योन्याश्रयत्वम्। कथं वा हलन्त्यम् आदिरन्त्येन सहेता इत्यनयोः अन्योन्याश्रयदोषः इति प्रश्ने हलन्त्यम् इति सूत्रस्यास्य व्याख्यानावसरे स्वभावत एव प्रकृतसूत्रस्थघटकीभूतहल्पदविषये सन्देह उत्पद्यते किमत्र वर्णसमाम्नायस्य अन्तिमं चतुर्दशं हल् इति सूत्रम्, हल् इति धातुः, हलिति प्रत्याहारो वा गृह्यते। अत्र तु हल्पदेन हकारादिलान्तसमुदायघटक-वर्णानाम् अवबोधकः हल्प्रत्याहारः गृह्यते। न च हल् धातुः वर्णसमाम्नायस्य अन्तिमम् हल् इति चतुर्दशं सूत्रं वा। यदि त्वत्र हल्-धातुः हलिति माहेश्वरसूत्रम् वा गृह्यते तर्हि हलन्त्यम् इति सूत्रेण विभक्तिस्थानां तवर्गसकारमकाराणाम् न इत्संज्ञकत्वम्। ततः तेषाम् इत्संज्ञानिषेधविधायकम् न विभक्तौ तुस्माः इति सूत्रमपि व्यर्थं स्यात्। अत एव हल्पदेन हल्प्रत्याहारो बोध्यः। एवञ्च उपदेशेऽजनुनासिक इत् इति सूत्राद् उपदेशे इति सप्तम्यन्तं पदम् इत् इति पदञ्च अनुवर्तते। तेन उपदेशे अन्त्यं हल् इत् स्यात् इति सूत्रार्थो फलति।

अतः हलन्त्यम् इति सूत्रस्य उपदेशे अन्त्यं हल् इत् स्यात् इति सूत्रार्थे सति हलन्त्यम् आदिरन्त्येन सहेता चेति सूत्रयोः परस्पराश्रयत्वेन अन्योन्याश्रयदोषो भवति।

तथाहि हलन्त्यम् इत्यत्र हल्पदार्थज्ञानम् आदिरन्त्येन सहेता इति सूत्राधीनम्। हकारादिलान्तसमुदायघटकवर्णानां हल्पदेन बोधः हल्प्रत्याहारसिद्धिं विना न सम्भवति। हल्प्रत्याहारनिर्माणाय आदिरन्त्येन सहेता इत्यस्य वाक्यार्थबोधः अपेक्ष्यते।

वाक्यार्थबोधे पदार्थोपस्थितिः कारणम् इति न्यायात् आदिरन्त्येन सहेता इति सूत्रस्य वाक्यार्थबोधः इत्पदार्थज्ञानं विना नैव सम्भवति। इत्पदार्थज्ञानञ्च हलन्त्यम् इति सूत्राधीनम्। अत एव हलन्त्यम् इति सूत्रस्य वाक्यार्थबोधाय निमित्तभूतंहल्पदार्थज्ञानम् आदिरन्त्येन सहेता इति सूत्राधीनम्। एवञ्च आदिरन्त्येन सहेता इति सूत्रस्य वाक्यार्थबोधाय निमित्तभूतम् इत्पदार्थज्ञानम् हलन्त्यम् इति सूत्राधीनम्। अतः हलन्त्यम् आदिरन्त्येन सहेता चेति सूत्रयोः स्ववाक्यार्थबोधाय परस्परापेक्षत्वात् अन्योन्याश्रयदोषः सम्भवति। अन्योन्याश्रयदोषाद् एव न कस्यचिद् सूत्रस्य वाक्यार्थबोधः इति भावः।

हल्संज्ञामनुपजीव्यैव हल्सूत्रे लकारस्य केनचित् सूत्रेण इत्संज्ञामबोधयित्वा हलन्त्यम् इत्यनेन हलाम् इत्संज्ञाविधानम् पाणिनेः अयुक्तम् इत्येवाभिप्रेत्य शेखरे नागेशेन भणितम्-

**न विभक्तौ इत्यादेः सार्थक्याय हलन्त्यम् इत्यस्योपदेशेऽन्त्यं हल् इदित्यर्थस्यावश्यकत्वेन हलन्त्यम्, आदिरन्त्येन इत्यनयोः परस्परा-पेक्षत्वेनाऽन्योन्याश्रयाल्लकारे इत्संज्ञामबोधयित्वा हलामित्संज्ञा-बोधनं पाणिनेरयुक्तम्।**[1]

अन्योन्याश्रयदोषपरिहाराय नागेशेन उपायत्रयम् उपस्थापितम्। अन्ते च भाष्यकारमतं समर्थितम्।

हयवरट् इति सूत्रादारभ्य हल् इति सूत्रं यावत् (दश सूत्राणि) आवर्त्त्य शषसर् इत्यन्तं समुदायमुद्दिश्य अर्थात् नव सूत्राणि उद्दिश्य दशमेन आवर्तितेन हल् इति सूत्रेण हल्संज्ञा विधेया। तेन तु आदिरन्त्येन सहेता इति सूत्रं विनैव हल्पदार्थज्ञानात् न अन्योन्याश्रयदोषः। प्रतिपादितञ्च नागेशेन-

**न च हयवर इत्यादेरावृत्त्या शषसर् इत्यन्तं समुदायमुद्दिश्य हल् इत्यनेन हल्संज्ञाऽपि विधेयेति वाच्यम्।**[2]

दशसूत्राणामावृत्तौ महद् गौरवं प्रसज्येत। हलन्त्यम् इति एकस्य सूत्रस्य आवृत्तौ तु लाघवं भवति। अतः गौरवदोषादेव इदम् अन्योन्याश्रयदोषसमाधानम् प्रत्याख्यातम्। उक्तञ्च नागेशेन-

**दशसूत्राऽऽवृत्तौ गौरवात्।**[3]

पाणिनिव्याकरणे उपदेशेऽजनुनासिक इत् हलन्त्यम् चेति सूत्रद्वयम् इत्संज्ञाविधायकम्। तत्र तु केषाञ्चिद् मतं यत् उपदेशेऽजनुनासिक इत् हलन्त्यम् इति सूत्रद्वयस्य स्थाने उपदेशे इदन्त्यम्, अच्, अनुनासिकः इति सूत्रत्रयम् स्यात्। तत्र प्रथमस्य उपदेशे इदन्त्यम् इति सूत्रस्य अर्थो भवति उपदेशे यद् अन्त्यम् तस्य इत्संज्ञा भवति। तेन तु उपदेशे अन्त्यो वर्णः अच् हल् वा भवतु तस्य इत्संज्ञा अनेन सूत्रेण विधेया इति भावः। हल्संज्ञामनुपजीव्यैव प्रोक्तसूत्रेण उपदेशे अन्त्यवर्णानाम् इत्संज्ञाविधानात् न अन्योन्याश्रयदोषः। अतः णकारादिवर्णानाम् इत्संज्ञायाम् अण् अच् हल् इत्यादयः प्रत्याहाराः सिद्ध्यन्ति।

अनन्तरम् द्वितीयं सूत्रं भवति अच् इति। पूर्वेण सूत्रेण अन्त्यस्य अचः इत्संज्ञा भवति अत्र तु अच् इति सूत्रेण अनन्त्यः यः अच् तस्य इत्संज्ञा अनेन भवति। तेन तु नुम् इत्यादिषु स्थलेषु अनेन सूत्रेण नकारोत्तरस्य उकारस्य प्रोक्तसूत्रेण इत्संज्ञा विधेया।

तृतीयं सूत्रं भवति अनुनासिकः इति। ननु अत्र एवम् आशङ्क्यते यत् अनुनासिकत्वम् तु अचः धर्मः, अतः यदि अनुनासिकसंज्ञकस्य अच एव इत्संज्ञा स्यादिति विवक्षितं भवति तर्हि पूर्वसूत्रद्वयेनैव अन्त्यस्य अनन्त्यस्य वा अनुनासिकस्य अचः इत्संज्ञासिद्धेः पुनः अनुनासिकः इति सूत्रं व्यर्थं भवति। तत्रोच्यते अनुनासिकः इति सूत्रे अच् इति पदम् अच् इति पूर्वसूत्रात् अनुवर्तते। अत एव अच् इति अनुवृत्तिसामर्थ्यादेव अनुनासिकः इति सूत्रेण यदि अचः इत्संज्ञा स्यात् तर्हि अनुनासिकस्यैव इति नियमो ज्ञायते। तेन तु निरनुनासिकस्य अचः इत्संज्ञा निरस्ता इति भावः।

तत्र यदि एवम् आक्षिप्यते यत् **अनन्तरस्य विधिर्भवति प्रतिषेधो वा** इति नियमात् अच् चेत् इत् भवति तर्हि अनुनासिक एव इति नियमः अनन्तरोक्तस्य अच् इति सूत्रस्य विषये एव प्रवर्तते , न तु उपदेशे इदन्त्यम् इति सूत्रविषये। तेन रु इति स्थले रेफोत्तरस्य उकारस्य इत्संज्ञा उपदेशे इदन्त्यम् इति सूत्रेण स्यादेव। तत्रोच्यते अच् चेत् इत् भवति तर्हि अनुनासिक एव इति नियमः यदि अच् इति सूत्रविषये एव भवति तदा अजनुनासिकः इति योगः एव उचितः तथापि अच्, अनुनासिकः इत्येवम् योगविभागसामर्थ्याद् पूर्वोक्तोऽयं नियमः अनन्तरस्य विधिर्भवति प्रतिषेधो वा इति न्यायं प्रबाध्य उपदेशे इदन्त्यम् इति सूत्रविषये अपि प्रवर्तते। अत एव रु इति स्थले रेफोत्तरस्य उकारस्य उपदेशे इदन्त्यम् इति सूत्रेण न इत्त्वप्रसक्तिः, तस्य अनुनासिकत्वाभावात्।

अनुनासिकः चेत् इत्स्यात् तदा अजेवेति विपरीतनियमः न शङ्क्यः, यतः विपरीतनियमे स्वीकृते मकारञकारादीनां हल्वर्णानाम् इत्संज्ञा न स्यात्, तेन अन्त्यात् अचः परम् मिदागमविधायकम् मिदचोऽन्त्यात् परः इति सूत्रं व्यर्थं स्यात्। अतः मिदचोऽन्त्यात् परः इति सूत्रज्ञापकात् एव अनुनासिकः चेत् इत्स्यात् तदा अजेवेति इति विपरीतनियमो न इति भावः।

अत एव उपदेशे इदन्त्यम्, अच्, अनुनासिकः इत्येतादृशे सूत्रन्यासे सति हल्ग्रहणम् व्यर्थम्, अन्योन्याश्रयदोषश्च न। प्रतिपादितञ्च नागोजिभट्टेन-

**ननु उपदेशे इदन्त्यम्, अच्, अनुनासिकः इति सूत्रत्रयमस्तु, अजित्यनन्त्यार्थम्, तृतीयेऽजित्यनुवृत्तिसामर्थ्यादच्चेदिद्भवति तर्ह्यनु-नासिक एवेति नियमाश्रयणाद्-रुप्रभृतौ न दोषः, योगविभाग-सामर्थ्याच्चानन्तरस्येति न्यायं बाधित्वा व्यवहितस्यापि तेन नियमः, मिदचोऽन्त्यात् इति ज्ञापकाच्च न विपरीतनियमः, एवञ्च हल्ग्रहणमपि व्यर्थमन्योन्याश्रयश्च न।**[4]

उपदेशे इदन्त्यम्, अच्, अनुनासिकः इत्येतादृशेन सूत्रभेदेन पाणिनिसूत्राणाम् पारायणजन्यादृष्टहानिः भवति, यतः भाष्यकारे-णापि अपाणिनीयन्तु भवति इति वचनेन एतादृशसूत्रकल्पनायाम् अपाणिनीयत्वम् स्यात्, तेन न अदृष्टज-नकत्वम् इति प्रकटीकृतम् इत्यपि न वाच्यम् पूर्वसूत्रन्यासापेक्षया कल्प्यमानन्यासस्य लघुत्वे अपाणिनीयत्वस्य अदोषत्वात्। पूर्वसूत्रन्यासापेक्षया यदि अस्मिन् कल्प्यमानसूत्रन्यासे लाघवम् स्यात् तर्हि अत्र अपाणिनीयत्वम् न

दोषाय भवति इति सूत्रत्रयवादीनाम् आशयः। हलन्त्यम्, उपदेशेऽजनुनासिक इत् इति सूत्रद्वयस्य स्थाने उपदेशे इदन्त्यम्, अच्, अनुनासिकः इति सूत्रन्यासेन हल्ग्रहणाभावात् लाघवम् एव भवति। उक्तञ्च नागेशेन-

**न च पाणिनिसूत्रभेदे पारायणादावदृष्टहानिः। तथा च तत्र तत्र भाष्यम्- अपाणिनीयन्तु भवति इति वाच्यम्। कल्प्यमानन्यासस्य लघुत्वे अस्यादोषत्वात्।[5]**

तमेव सूत्रभेदं कथयन्ति विपश्चितः यत्र तदर्थकमेव अन्यभूतं सूत्रं क्रियते अथवा तदपेक्षया अधिकं क्रियते। यदि तदेव सूत्रं संक्षिप्य प्रदर्श्यते तर्हि असौ सूत्रभेदः न दोषाय भवति इत्येतत्सर्वम् अच उपसर्गात्तः इति सूत्रव्याख्यानावसरे सविस्तारं भाष्यकारेण प्रतिपादितम्। ननु अनेन सूत्रभेदेन अदृष्टानुत्पत्तिरेव दोषः इत्यपि न शङ्क्यम, दृष्टफलेनैव वेदाङ्गानाम् अदृष्टार्थकत्वात्। अत एव दृष्टफलेनैव वेदाङ्गानाम् अदृष्टफलजनकत्वम् इति स्वीकृते पाणिनिसूत्रैः अथवा सूत्रघटकपदैः यत्र यत् किमपि भाष्यकारेण ज्ञापितम् तस्य ज्ञापकपरकभाष्यस्य उच्छेदो न भवतीति भावः। उक्तञ्च शेखरे-

**सति सम्भवे दृष्टद्वारैवाङ्गानामदृष्टार्थत्वम् इति तदाशयः। अत एव तत्र तत्र ज्ञापकपरसकलभाष्योच्छेदो न।[6]**

अदृष्टार्थम् एव पाणिनिनिर्देशः आवश्यको भवति, तदा पाणिनिनिर्देशस्य व्यर्थत्वं प्रतिपाद्य ज्ञापकपरं वचनम् असङ्गतम् स्यात् इत्येवाशङ्क्य दृष्टद्वारैव वेदाङ्गानाम् अदृष्टार्थकत्वम् इति उररीकरणीयम्। तथाहि अभ्यासस्यासवर्णे इति सूत्रेण असवर्णपदग्रहणेन वा वर्णादाङ्गं बलीयो भवति इति परिभाषा ज्ञाप्यते। यदि तु अत्र प्रकृतसूत्रम् सूत्रघटकम् असवर्णपदं वा अदृष्टार्थम् आवश्यकम् भवति तर्हि तत्र व्यर्थत्वं प्रतिपाद्य उक्तपरिभाषाज्ञापनम् असङ्गतम् स्यादेव। अत एव दृष्टफलेनैव अङ्गानाम् अदृष्टोत्पादकत्वम् इति स्वीकृते पूर्वोक्तपरिभाषा एव अभ्यासस्यासवर्णे इति सूत्रस्य दृष्टफलम् एवञ्च तेन दृष्टफलेनैव सूत्रस्यास्य अदृष्टार्थकत्वम् इति भावः।

पुनश्च अत्र एका शङ्का समुदेति यत् भाष्यकारेण इको यणचि इति सूत्रव्याख्यानाप्रसङ्गे कथितम् पाणिनेः कानिचन पदानि शुद्धादृष्टार्थम्, कानिचन पदानि च दृष्टादृष्टार्थम् इति। परन्तु अच उपसर्गात्तः इति सूत्रव्याख्यानावसरे महाभाष्यकारेण अङ्गानाम् अदृष्टार्थत्वम् दृष्टद्वारैव प्रतिपादितम्। अतः मतद्वयस्य परस्परं विरोधं समाधयता उच्यते इको यणचि इति सूत्रे भाष्यकारमतम् एकदेशि भवति एवञ्च अच उपसर्गात्तः इति सूत्रे भाष्यकारमतम् सिद्धान्त एव। अतो न परस्परविरोधः इति भावः।

अत एव उपर्युक्तविवेचनाद् एतदेव स्पष्टं भवति यत् लाघवात् उपदेशे इदन्त्यम्, अच्, अनुनासिकः, इति सूत्रन्यास एवाश्रयणीयः। तत्र नागेशभट्टः मतमिदं दूषयन् कथयति यत् - उपदेशे इदन्त्यम्, अच्, अनुनासिकः इति सूत्रत्रयकरणपक्षे अनुनासिकः इति सूत्रेण अच् चेत् इत् भवति तर्हि अनुनासिक एव इति नियमज्ञापनम, मिदचोऽन्त्यात् परः इति सूत्रेण विपरीतनियमनिषेधः, अच् अनुनासिकः इत्येतादृशयोगविभागसामर्थ्याद् उपदेशे इदन्त्यम् इति व्यवहितसूत्रविषये अपि नियमस्य प्रवृत्तिः इत्येतत्सर्वं स्वीकरणीयम्। अनेन प्रकृते पक्षे गौरवदोष एव भवति न तु लाघवम्। पक्षेऽस्मिन् हल्शब्दोच्चारणे वर्णाभिव्यक्तिजनककण्ठाद्यभिघातरूपं गौरवमेव गौरवम् परन्तु योगविभागः, नियमः, विपरीतनियमवारणम् इत्यादिकं यत् ज्ञानजनकमनोव्यापाररूपं गौरवम् न गौरवम् इति न राजाज्ञाऽस्ति।अतः अस्मिन् सूत्रत्रयकरणपक्षे वर्णाभिव्यक्तिजनककण्ठाद्यभिघातरूपगौरवे असत्यपि ज्ञानजनकमनोव्यापारगौरवसत्त्वात् अन्योन्याश्रयदोषपरिहाराय पक्षोऽयंनमान्यः। उक्तञ्च शेखरे-

**न हि वर्णाभिव्यक्तिजनककण्ठाद्यभिघातगौरवमेवादर्त्तव्यम, न तु ज्ञानजनकमनोव्यापारगौरवमिति राजाज्ञाऽस्ति।[7]**

अन्योन्याश्रयदोषनिराकरणाय मतद्वयमुपस्थाप्य मतान्तरम् उपस्थापयति नागेशः न च सह आ समन्तात् एति गच्छतीति सहेता मध्यमो वर्णः इत्यादिना। तथाहि आदिरन्त्येन सहेता इति सूत्रे इत्पदेन यदि इत्संज्ञकस्य बोधः स्यात् तर्हि इत्संज्ञावबोधाय हलन्त्यम् इति सूत्रापेक्षत्वात् अन्योन्याश्रयदोषः सम्भवति। अत एव सहेतृशब्दस्य प्रथमैकवचने सहेता इति रूपम् इत्येव मन्तव्यम्। कटीधातौ अथवा वीधातौ प्रश्लिष्टात् इ-धातोः कर्त्रर्थे तृच्-प्रत्यये इकारस्य गुणे एकारे एतृ इति रूपं निष्पन्नम्। सह आ एतृ इति स्थिते एङि पररूपम् इति सूत्रेण पूर्वपरयोः आकारैकारयोः स्थाने पररूपैकादेशे एकारे सह एतृ इति निष्पन्ने ओमाङोश्च इति सूत्रेण पररूपैकादेशे निष्पन्नस्य सहेतृशब्दस्य प्रथमैकवचने सहेता इति रूपम् सिद्धम्। ओमाङोश्च इति सूत्रेण यथा पररूपैकादेशः स्यात् तदर्थमेव सह आ एतृ इत्यत्र आङः सन्निवेशो भवति। अन्यथा तु वृद्धेरेव प्रसक्तिः। ननु अत्र कथम् अध्ययनार्थकस्य ईङ्धातोः स्मरणार्थकस्य इग्धातोः वा ग्रहणं न भवति , अत्र उच्यते अध्युपसर्गं विना उभयोः धातोः अप्रयोगात्। पुनश्च यदि गत्यर्थकात् इण्धातोः कर्तरि तृच्-प्रत्यये इकारस्य गुणे एकारे एतृ इति रूपस्य निष्पत्तिः स्यात् तर्हि सह एतृ इति स्थिते एत्येधत्यूठ्सु इति सूत्रेण वृद्धिः स्यात्। ततः सहेता इति पदनिष्पत्तिः दुर्वारा।

सहेताशब्दस्य अर्थो भवति सह आ समन्ताद् एति गच्छतीति बुद्धिविषयो भवतीति सहेता मध्यमो वर्णः इति। अत्र तु सहेताशब्दः योगरूढशब्दः। योगशक्त्या सहेता इत्यस्य सह आ समन्ताद् एति गच्छतीति अर्थः। एवञ्च रूढिशक्त्या अस्य सहेतापदस्य मध्यमो वर्णः इत्यर्थो लभ्यते। सहेतापदस्य मध्यमो वर्णः इत्यर्थे विवक्षिते आदिरन्त्येन सहेता इति सूत्रस्य सहेता मध्यमो वर्णः अन्त्यसहितादिसंज्ञकः स्यात् इत्यर्थः स्यात्। ततः अण्, अच्, हल् इत्यते खलु प्रत्याहाराः सिद्ध्यन्ति। अत एव आदिरन्त्येन सहेता इति सूत्रे सहेतापदस्य मध्यमो वर्णः इत्यर्थे विवक्षिते आदिरन्त्येन सहेता इति सूत्रस्य वाक्यार्थबोधाय हलन्त्यम् इति सूत्रस्य अनपेक्षत्वात् न अन्योन्याश्रयः इति भावः। उक्तञ्च शेखरे-

**न च सह आ समन्ताद् एति गच्छतीति सहेता मध्यमो वर्ण इत्यर्थ इति अतो नान्योन्याश्रय इति वाच्यम्।[8]**

अन्योन्याश्रयदोषपरिहाराय प्रदर्शितम् मतमिदं दूषयन् नागेश आह यदि पूर्वोक्तविवेचनानुसारमेव अन्योन्याश्रयदोषपरिहारो भवति तर्हि हलन्त्यम् इति सूत्रस्य व्याख्यानप्रसङ्गे भाष्यकारेण

अन्योन्याश्रयदोषमुद्भाव्य तद्दोषनिराकरणं व्यर्थम् आपद्यते। अतः भाष्यकारमतानुसारं एतदेव स्वीकरणीयं यत् सहपूर्वक-आङ्पूर्वक-कटीधातौ अथवा वीधातौ प्रश्लिष्टात् इधातोः कर्तरि अर्थे तृच्प्रत्ययः न भवति। सहेतापदस्य योगशक्त्या च आ समन्ताद् एति गच्छतीति सहेता मध्यमो वर्णः इत्यर्थो न लभ्यते। एवञ्च सहेता इति पदनिष्पत्तये प्रयुक्तस्य आङ् इत्युपसर्गस्य आ समन्ताद् इत्यर्थस्य न कुत्रापि अन्वयः सम्भवति, न च कुत्रापि तस्योपयोगिता वर्तते। अतः आ समन्ताद् इत्यर्थः व्यर्थ एव। सहेताशब्दः मध्यमो वर्णः इत्यर्थे रूढः इत्यपि न वाच्यम् तत्र प्रमाणाभावात्। प्रतिपादितम् नागेशेन-

**अन्योन्याश्रयतत्परिहारादीन् वदता भाष्यकारेण कटी वी इत्यत्र प्रश्लिष्टात् इङ् गतौ इत्यतश्च सह आङ्पूर्वात्तृजभावबोधनात् । किञ्च योगमर्यादया तत उक्तार्थालाभः। आ समन्तादित्यस्यानन्वितार्थत्वं व्यर्थत्वञ्च। रूढौ तु न मानमतः सूत्रावृत्त्या तं परिहरति – हलन्त्यमिति।**[9]

भाष्यकारेणापि हलन्त्यम् इति सूत्रव्याख्यानावसरे अन्योन्याश्रयदोषमाशङ्क्य उक्तम् अन्त्यं हल् इत्संज्ञं भवति, लकारश्च इत्संज्ञं भवतीति। ननु कथम् अयम् अर्थः सिद्ध्यति इति प्रश्ने भाष्यकारेण स्वयमेव उच्यते यत् एकशेषनिर्देशाद्वा सिद्धम् इति। हलन्त्यम् इति सूत्रघटकहल्पदे हल् च हल् च इति हल् इत्येवम्प्रकारेण एकशेषेण पाणिनिना हल्पदम् उच्चारितम्। अतः हल्पदद्वयस्य लाभार्थं हल्पदस्य आवृत्तिः कर्त्तव्या। एवञ्च सूत्रघटितान्त्यशब्दस्य द्वन्द्वान्ते श्रूयमाणं पदम् यथा प्रत्येकम् अन्वेति तद्वत् हल्पदद्वयेन सह अन्वयो भवति। उभयत्र एव हलः अन्त्यम् हलन्त्यम् इति षष्ठीसमासो भवति। तत्र तु षष्ठी निरूप्यनिरूपकभावसम्बन्धे भवति। हलन्त्यम् इति प्रथमस्य हल् इति सूत्रस्य अन्त्यम् इत्संज्ञं भवति इत्यर्थः सम्पद्यते। हलन्त्यम् इत्यनेन सूत्रेण हल्सूत्रस्थस्य लकारस्य इत्संज्ञायाम् लकारश्चेद्भवति इति भाष्यकारवचनम् सङ्गतम् भवति। इत्पदार्थावबोधे सति आदिरन्त्येन सहेता इति सूत्रेण हल्प्रत्याहारबोधात् हलूपान्त्यम् इत् भवति इति द्वितीयस्य हलन्त्यम् इति सूत्रस्य अर्थः सम्पद्यते इति भावः। अतो न अन्योन्याश्रयदोषः।

अत्र एवम् शङ्का समुदेति यत् हलन्त्यम् हलन्त्यम् इति सूत्रद्वये निरूप्यनिरूपकभावार्थे षष्ठीं विधाय षष्ठी इति सूत्रेण षष्ठीसमासः विहितः। हलन्त्यम् इति सूत्रेण यत्र हल्सूत्रस्य अन्त्यम् इत् स्यात् इत्यर्थः सङ्गच्छते तत्र अयं षष्ठीसमासः सङ्गतो भवति परन्तु यत्र हलूपान्त्यम् इत् स्यात् इति हलन्त्यम् सूत्रस्य अर्थो भवति तत्र अभेदप्रतीतेः निरूप्यनिरूपकभावार्थे षष्ठीं विधाय षष्ठी इति सूत्रमाश्रित्य षष्ठीसमासविधानं कथं सङ्गतम् भवति इति प्रश्ने भाष्यकारः स्वयमेव कथयति यत् राहोः शिरः इत्यत्र यथा अभेदे सत्यपि भेदारोपेण राहुशब्दात् षष्ठी भवति तथैव उपदेशे अन्त्यस्य हलः इत्संज्ञाविधायके हलन्त्यम् इति सूत्रे अपि भेदारोपेणैव षष्ठी भवति। पाणिनिना एकशेषेण हलन्त्यम् इति सूत्रघटकीभूतम् हल्पदम् उच्चारितम्। बोद्धृणां तु आवृत्त्या एव हल्पदद्वयस्य बोधः नान्यथा।

भाष्यकारेण हलन्त्यम् इति सूत्रघटकीभूतहल्पदे एकशेषं स्वीकृत्य हल्पदस्य आवृत्त्या हल्पदद्वयेन सह अन्त्यशब्दस्य अन्वयः स्वीकृतः। तेन एतदेव स्पष्टं भवति यत् हलन्त्यम् इति सूत्रावृत्तौ भाष्यकारस्य तात्पर्यम्। भाष्यकारमतम् प्रतिपादितम् नागेशेन-

**भाष्येऽप्यन्योन्याश्रयमाशङ्क्यहलन्त्यमित्संज्ञं भवति, लकारश्चेद्भवतीति वक्तव्यमित्युक्त्वा एकशेषनिर्देशाद्वासिद्धम्, हल् च हल् च हल् हलन्त्यमित् इत्युक्तम्। तस्यायं भावः कृतैकशेषेण हल्पदेन सम्बन्धसामान्यषष्ठ्या समासोऽन्त्यशब्दस्य च द्वन्द्वान्ते श्रूयमाणस्येवोभयत्रान्वयः, एवञ्च हल्सूत्रान्त्यं हलूपान्त्यञ्चेति बोधः, अन्त्ये राहोः शिर इतिवत्षष्ठीति। अत्रोच्चारयितुरेकशेषनिर्देशो बोद्धुस्त्वावृत्त्या बोधः।**[10]

कैयटेन तु षष्ठ्याः सामीप्यार्थं स्वीकृत्य हस्य ल् हल् इत्येवम्प्रकारेण हल्पदे षष्ठीसमासं निरूप्य हकारस्य समीपः यः लकारः स इत्संज्ञकः भवतीत्यर्थः प्रतिपादितः। हलूपान्त्यञ्च इत्संज्ञं भवति इति द्वितीयस्य हलन्त्यम् सूत्रस्य अर्थः कैयटेन व्याख्यातः।

हसमीपो लकारः इत् भवतीति कैयटस्य व्याख्यानेन अन्त्यशब्दस्य हल्पदेन सह अन्वयो न भवति यतः, हल्सूत्रस्य यद् अन्त्यम् भवति तदेव हकारसमीपः लकारो भवति। अतः कैयटमतानुसारम् लकारस्येत्संज्ञाविधायके सूत्रे अन्त्यपदस्यग्रहणम् अनावश्यकमेव। अन्त्यपदं विना एव हल्सूत्रस्थस्य लकारस्य इत्संज्ञकत्वात् हलन्त्यम् इति सम्पूर्णसूत्रावृत्तिः न कैयटसम्मता।

तत्र नागेशेन एतदुच्यते यत् कैयटव्याख्यानं तु न भाष्यकारसम्मतम्। अन्त्यशब्दस्य हल्पदद्वयेन सह अन्वये सति हलन्त्यम् हलन्त्यम् इति सूत्रद्वयम् भवति। तत्र हल्सूत्रस्थस्य लकारस्य इत्संज्ञाविधायके हलन्त्यम् इति प्रथमसूत्रे हल्सूत्रान्त्यमित् इत्येव भाष्यकारेण उक्तम्। तत्र तु भाष्यकारेण हल्सूत्रस्य अन्त्यशब्दस्य च उल्लेखः कृतः। यदि कैयटव्याख्यानमेव भाष्यकारस्य अभिप्रायः स्यात् तर्हि हल् इत्संज्ञं भवति हलन्त्यञ्चेदिति वक्तव्यम् भवति। परन्तु हल्सूत्रान्त्यम् इति भाष्यकारवचनात् सम्पूर्णसूत्रावृत्तौ एवभाष्यकाराभिप्रायः सिद्ध्यति एवञ्च षष्ठ्याः सामीप्यार्थाभावात् कैयटस्य व्याख्यानम् असङ्गतमेव। उक्तञ्च शेखरे-

**हसमीपो लकार इत् , हलूपान्त्यञ्चेति कैयटोक्तव्याख्यायान्तु हल् इत्संज्ञं भवति, हलन्त्यञ्चेदिति वदेदित्यूह्यम्।**[11]

सूत्रावृत्त्या अन्योन्याश्रयदोषपरिहारेऽपि नागेशः पुनः न विभक्तौ इत्यादिना अन्योन्याश्रयदोषं प्रदर्शयति। तथाहि वाक्यार्थबोधं प्रति पदार्थज्ञानस्य कारणत्वात् न विभक्तौ तुस्माः इति सूत्रस्य वाक्यार्थबोधाय विभक्तिपदार्थज्ञानम् अपेक्षितं भवति। विभक्तिपदबोध्ययोः सुप्तिङोः ज्ञानं हलन्त्यम् इति सूत्रस्य वाक्यार्थबोधात् परमेव सम्भवति। **प्रकल्प्य च अपवादविषयं तत उत्सर्गः प्रवर्तते** अर्थात् अपवादसूत्रस्य विषयं परित्यज्य एव उत्सर्गः प्रवर्तते इति अस्य न्यायस्य अर्थः। न्यायमिममाश्रित्य न विभक्तौ तुस्माः इति अपवादसूत्रस्य वाक्यार्थबोधोत्तरमेव उत्सर्गस्य हलन्त्यम् इति सूत्रस्य प्रवृत्तिः भवति। अत एव न विभक्तौ तुस्माः इति सूत्रस्य वाक्यार्थबोधाय हलन्त्यम् इति सूत्रस्य वाक्यार्थबोधः अपेक्षितः। एवञ्च हलन्त्यम् इति सूत्रस्य वाक्यार्थबोधाय न विभक्तौ तुस्माः

इत्यस्य वाक्यार्थबोधः अपेक्षितः। अतः अन्योन्याश्रयदोषः तदवस्थ एव इति भावः। प्रतिपादितम् शेखरे-

**नन्वेवमपि न विभक्ताविति विभक्तिपदबोद्ध्यसुप्तिङ्बोधो हलन्त्य-मिति वाक्यार्थबोधोत्तरं तद्बोधश्चापवादवाक्यार्थबोधोत्तरमित्य-न्योन्याश्रयः तदवस्थ एव।**[12]

अन्योन्याश्रयदोषनिराकरणाय नागेशः कथयति अपवादसूत्रस्य वाक्यार्थबोधात् पूर्वमेव यदि पदपदार्थोपस्थितिः भवति तर्हि उत्सर्गसूत्रस्य वाक्यार्थबोधे न प्रतिबन्धकता तिष्ठति। अर्थात् पदपदार्थोपस्थितेः अपवादस्य वाक्यार्थबोधात् पूर्वमेव उत्सर्गस्य वाक्यार्थबोधः भवति। तेन न विभक्तौ तुस्माः इति अपवादसूत्रस्य वाक्यार्थबोधम् विनापि पदपदार्थोपस्थितेः उत्सर्गस्य हलन्त्यम् इति सूत्रस्य वाक्यार्थबोधः स्यादेव।

अभावप्रतिपत्तये प्रतियोगिज्ञानम् आवश्यकम् भवति परन्तु प्रतियोगिज्ञानं प्रति अभावस्य कारणता न हि कस्यापि सम्मता। प्रतियोगिज्ञानं विना निषेधसूत्रस्य वाक्यार्थबोधः न सम्भवति। न विभक्तौ तुस्माः इति सूत्रस्य वाक्यार्थबोधाय विभक्तिपदार्थज्ञानम् अपेक्षितं भवति, तथापि हलन्त्यम् इति सूत्रघटकस-कलपदपदार्थोपस्थितेः हलन्त्यम् इत्यस्य अर्थबोधः भवत्येव। अत एव न विभक्तौ तुस्माः इति निषेधसूत्रस्य वाक्यार्थबोधमनपेक्ष्यैव हलन्त्यम् इति सूत्रस्य वाक्यार्थबोधः भवति। उक्तञ्च शेखरे-

**अपवादवाक्यार्थबोधात्पूर्वं पदपदार्थोपस्थतावुत्सर्गवाक्यार्थबोधे प्रति-बन्धकाभावात्। न ह्यभावज्ञाने प्रतियोगिज्ञानस्येव प्रतियोगिज्ञा-नेऽभावज्ञानस्य कारणता कस्यापि सम्मता, प्रतियोगिज्ञानं विना निषेधवाक्यार्थासम्भवाच्च।**[13]

यदि अपवादस्य वाक्यार्थबोधात्पूर्वमेव उत्सर्गस्य वाक्यार्थबोधो भवति तर्हि अपवादसूत्रस्य विषये अपि उत्सर्गसूत्रस्य प्रवृत्तेः भुक्तवन्तं प्रति मा भुक्थाः इति न्यायम् आधारीकृत्य अपवादशास्त्रप्रणयने व्यर्थत्वमेवापद्येत। अतः पूर्वं ह्यपवादाः अभिनिविशन्ते पश्चादुत्सर्गाः इति न्यायम् आश्रित्य उत्सर्गस्य वाक्यार्थबोधात् पूर्वमेव अपवादस्य वाक्यार्थबोधापेक्षत्वात् अन्योन्याश्रयः तदवस्थ इति भावः।

**पूर्वं ह्यपवादाः अभिनिविशन्ते पश्चाद् उत्सर्गाः** इति न्यायम् आश्रित्य हलन्त्यम् इत्युत्सर्गस्य वाक्यार्थबोधे न विभक्तौ तुस्माः इति अपवादवाक्यार्थबोधापेक्षत्वात् अन्योन्याश्रयदोषः तदवस्थः इत्येव अभिप्रेत्य नागेशः पूर्वं ह्यपवादाः अभिनिविशन्ते पश्चादुत्सर्गाः इत्यस्य त्वयं भावः इत्यादिना प्रकृतस्य न्यायस्य अर्थं प्रतिपादयति। पूर्वं ह्यपवादाः इत्यादेः त्वयं भावः यः लक्षणैकचक्षुष्कः भवति अर्थात् यस्य सविधे लक्षणम् सूत्रम् एव लक्ष्यसाधुत्वज्ञानसाधनम् भवति स लक्षणैकचक्षुष्कः अपवादविषयम् पर्यालोच्य यत्रापवादसूत्रम् न प्रवर्तते तादृशं स्थलम् निर्णयति। अयं तु लक्ष्यः न अपवादस्य इति यदा निश्चयो भवति तदा लक्षणैकचक्षुष्कः जनः उत्सर्गशास्त्रबलेन तल्लक्ष्यं संस्करोति। अन्यथा तु उद्देश्यतावच्छेदकावच्छिन्नसकलोद्देश्यानां संस्कारः उत्सर्गशास्त्रेण भवति इत्येव बोधे सति अपवादशास्त्रविषयः अपि यदि उत्सर्गशास्त्रस्य विषयः स्यात् तदा अयम् उत्सर्गशास्त्रस्य विषयः , अयम् अपवादशास्त्रस्य विषयः इति उत्सर्गापवादयोः विषयव्यवस्थानापत्त्या भुक्तवन्तं प्रति मा भुक्था इति वाक्यस्येव अर्थात् भोजनं कृतवन्तं प्रति भोजनं मा कुरु इति निषेधः यथा अनर्थकम् स्यात् तद्वत् अयम् अपवादशास्त्रस्य विषयः , अत्र उत्सर्गः न प्रवर्तते इति कथनमपि व्यर्थम् भवति अर्थात् अपवादशास्त्रमेव व्यर्थम् स्यात्। अतः अपवादशास्त्रस्य वैयर्थ्यापत्त्या अपवादशास्त्रस्य पर्यालोचनेन तद्विषयलक्ष्यसंस्कारं निर्णीय अपवादशास्त्राविषयलक्ष्य-संस्कारः उत्सर्गशास्त्रीयवाक्योपप्लवद्वारोत्सर्गेण भवति। अन्यथा तु असति बाधके उद्देश्यतावच्छेदकावच्छेदेन विधेयान्वयः इति नियममाश्रित्य शास्त्रद्वयस्य एव प्रमाणत्वात् शास्त्रद्वयस्य एव लक्ष्ये पर्यायेण प्रवृत्तेः तत्र विकल्पापत्तिः अर्थात् पर्यापत्तिः दोषः भवति। अत्र विकल्पापत्तिः इत्यस्य अर्थः भवति पर्यापत्तिः यतः यदि एतादृशे लक्ष्ये आदौ उत्सर्गशास्त्रस्य प्रवृत्तिर्भवति तर्हि तदनन्तरम् अपवादशास्त्रस्य प्रवृत्तिः न स्यादेव। अतः लक्ष्ये पर्यायेण उत्सर्गापवादयोः शास्त्रयोः प्रवृत्तेः पर्यापत्तिदोषः भवति इति भावः।

भुक्तवन्तं प्रति मा भुक्था इति न्यायस्य व्यभिचरितत्वं प्रदर्शयन् नागेश आह लुगादिना जातस्य निवृत्तेः भुक्तवन्तं प्रति मा भुक्था इति न्यायस्य व्यभिचारः स्पष्टमेव। भुक्तवन्तं प्रति मा भुक्था इति न्याये व्यभिचरिते सत्यपि यत्र लुगित्यादिना कस्यापि निवृत्तिः भवति तत्र निवृत्तेः तदनुत्पत्तौ तात्पर्यात् न दोषः। प्रतिपादितञ्च शेखरे-

**यद्यपि भुक्तवन्तं प्रतीति न्यायो लुगादिना जातनिवृत्तेर्व्यभिचरित-स्तथापि तत्राप्यनुत्पत्तिरेवेति न दोषः।**[14]

इको यणचि इति उत्सर्गसूत्रम् एवञ्च अकः सवर्णे दीर्घः इति अपवादशास्त्रम् आदौ बुद्ध्यारूढं सत् श्रीशः इत्यादि-अपवादशास्त्रस्य लक्ष्यं परित्यज्य सुद्ध्युपास्यः इत्येतादृशलक्ष्यसंस्कारः उत्सर्गशास्त्रीय-वाक्योपप्लवद्वारोत्सर्गेण भवति। अतः उत्सर्गशास्त्रस्य वाक्यार्थबोधाय अपवादशास्त्रस्य वाक्यार्थबोधानपेक्षत्वं वर्तते। अपवादशास्त्रम् केवलं बुद्ध्यारूढमेव भवति। अतः पूर्वं ह्यपवादाः अभिनिविशन्ते पश्चादुत्सर्गाः इति न्यायमाश्रित्य हलन्त्यम् इत्युत्सर्गस्य वाक्यार्थबोधे न विभक्तौ तुस्माः इति अपवादस्य-वाक्यार्थबोधानपेक्षत्वात् अन्योन्याश्रयदोषः तदवस्थः इति न वाच्यम्।

न्यायानङ्गीकारेऽपि अर्थात् पूर्वं ह्यपवादा अभिनिविशन्ते पश्चादुत्सर्गाः इति न्यायानस्वीकारे श्रीशः इत्यादिप्रयोगविषये इको यणचि, अकः सवर्णे दीर्घः इति सूत्रद्वयस्य पर्यायेण प्रवृत्तेः विकल्पापत्तिदोषः स्यादेव। प्रकृते न्याये अभिनिविशन्ते इत्यस्य अर्थः भवति बुद्ध्यारूढाः भवन्तीति। लक्षणैकचक्षुष्कः जनः अपवादशास्त्रस्य ज्ञानमात्रं कृत्वा अपवादविषयं परित्यज्य उत्सर्गशास्त्रेण लक्ष्यं संस्करोति। अतः उत्सर्गवाक्यार्थबोधे अपवादवाक्यार्थबोधस्यानपेक्षत्वात् न अन्योन्याश्रयदोषः।

परन्तु यः लक्ष्यैकचक्षुष्कः जनः भवति तस्य दृष्टिः लक्ष्ये तिष्ठति। लक्ष्यैकचक्षुष्कः लक्ष्यसिद्धये तदनुरूपलक्षणप्रवृत्तिद्वारेण लक्ष्यसाधुत्वं निर्णयति। अपवादशास्त्रविषयपर्यालोचनं विनैव उत्सर्गशास्त्रेण लक्ष्यं संस्करोति। अतः अस्मिन् पक्षे उत्सर्गवाक्यार्थबोधात् पूर्वं अपवादवाक्यार्थबोधस्य अनपेक्षत्वात् अन्योन्याश्रयदोषः न भवत्येव इति भावः।

यदि लक्ष्यैकचक्षुष्कस्य लक्षणानपेक्षत्वं वर्तते तर्हि उत्सर्गेण लक्ष्यसंस्कारः कथं भवति इति प्रश्ने नागेशेन उच्यते लक्ष्यैकचक्षुष्कस्य शास्त्रसम्बन्धिप्रवृत्तिः एतदर्थं भवति यत् शास्त्रप्रक्रियास्मरणपूर्वकं शब्दप्रयोगेण धर्मो भवति। प्रकल्प्य चापवादविषयम् ततः उत्सर्गः प्रवर्तते इत्यत्र प्रकल्प्य इत्यस्य अर्थो भवति परित्यज्य न तु बुद्ध्यारूढः इति। अपवादशास्त्रपर्यालोचनात् पूर्वमेव तद्विषयम् प्रकल्प्य परित्यज्य उत्सर्गशास्त्रस्य प्रवृत्तिः भवति इति प्रकृतन्यायस्यार्थः। अत्र तु प्रकल्प्य इति पदस्य बुद्ध्यारूढं कृत्वा इत्यर्थः स्यात् तदा प्रकल्प्य चापवादविषयम् पूर्वं ह्यपवादाः चेति न्याययोः न भेदः स्यादेव ।

प्रकल्प्य चापवादविषयं तत उत्सर्गः प्रवर्तते इत्यत्र कैयटेन प्रकल्प्य इति पदस्य सम्पाद्य इत्यर्थः स्वीकृतः। यथा युवन्शब्दात् द्वितीयाबहुवचनविवक्षायाम् शस्प्रत्यये परस्य यणः वकारस्य श्वयुमघोनामतद्धिते इति सूत्रेण सम्प्रसारणम् उकारो भवति। ततः पूर्वस्य यणः यकारस्य प्रोक्तसूत्रेण प्राप्तस्य इकाररूपस्य सम्प्रसारणस्य न सम्प्रसारणे सम्प्रसारणम् इति सूत्रेण निषेधे सवर्णदीर्घे च यूनः इति रूपं सिद्धम् भवति। अस्मिन् स्थले यदि परस्य यणः पूर्वं सम्प्रसारणं न स्यात् तर्हि श्वयुवमघोनामतद्धिते इति सूत्रेण पूर्वयणः प्राप्तस्य सम्प्रसारणस्य न सम्प्रसारणे सम्प्रसारणम् इति सूत्रेण निषेधोऽपि न स्यात्। न सम्प्रसारणे सम्प्रसारणम् इति निषेधशास्त्रविषयम् श्वयुवमघोनामतद्धिते इति उत्सर्गशास्त्रम् सम्पादयति, अपवाद-शास्त्रविषयम् सम्पाद्य एव उत्सर्गशास्त्रप्रवृत्तिः भवति इत्येतत् सर्वं अभ्यस्तसंज्ञाविधायके उभे अभ्यस्तम् इति सूत्रव्याख्यानावसरे कैयटेन उपस्थापितम्।

पूर्वोक्तं कैयटमतं दूषयन् नागेशः स्वमतं प्रकटयति यत् कैयटमतं भाष्यविरुद्धमेव। कैयटमतानुसारम् प्रकल्प्यपदस्य सम्पाद्य इत्यर्थे स्वीकृते न सम्प्रसारणे सम्प्रसारणम् इति सूत्रस्थभाष्यविरोधो भवति। न सम्प्रसारणे सम्प्रसारणम् इति सूत्रव्याख्यानावसरे भाष्यकारेण उक्तम् एतदेव ज्ञापयति परस्य न पूर्वस्येति अर्थात् न सम्प्रसारणे सम्प्रसारणम् इति सूत्रमेव ज्ञापयति यत् आदौ परस्य यणः सम्प्रसारणं स्यात् न तु पूर्वस्य यणः। अन्यथा यदि पूर्वयणः सम्प्रसारणं स्यात् तर्हि न सम्प्रसारणे सम्प्रसारणम् इति सूत्रमेव व्यर्थं स्यात् यतः यस्य पूर्वयणः निषेधः न सम्प्रसारणे इत्यादिना भवति तस्यैव श्वयुवमघोनामतद्धिते इति सूत्रेण सम्प्रसारणसंज्ञाविधानात्। अतः न सम्प्सारणे सम्प्रसारणम् इति सूत्रं व्यर्थं सत् ज्ञापयति यत् परस्य यणः सम्प्रसारणम् आदौ भवति न तु पूर्वस्य तु। यदि कैयटमतानुसारं प्रकल्प्यपदस्य सम्पाद्य इत्यर्थं स्वीकृत्य प्रकल्प्य चापवादविषयम् इत्यादिपरिभाषामाश्रित्य परस्य यणः सम्प्रसारणम् स्यात् तदा भाष्यकारस्य एतदेव ज्ञापयति परस्य न तु पूर्वस्य इति वचनम् असङ्गतम् स्यात्। अत एव न सम्प्रसारणे सम्प्रसारणम् इति सूत्रस्थभाष्ये एतदेव ज्ञापयति परस्य न तु पूर्वस्य इति वचनात् कैयटमतं भाष्यविरुद्धमित्येव प्रतिभाति इति भावः।

यदि तत्र एवमुच्यते न सम्प्रसारणे सम्प्रसारणम् इति सूत्रं व्यर्थं सत् प्रकल्प्य चापवादविषयम् इति परिभाषां ज्ञापयति एवञ्च अनया परिभाषया परस्य यणः सम्प्रसारणविधानम् पुनश्च तन्निमित्तीकृत्य पूर्वस्य यणः सम्प्रसारणनिषेधः इति कैयटोक्तिः तस्यैव तात्पर्यम्। अतो न भाष्यविरोधः। इत्येवाभिप्रेत्य कैयटकथने यद्वा इति शब्देन विरोधः ग्रन्थकारेण प्रदर्शितः। तथाहि भाष्यकारेण यूनः इति प्रयोगार्थमुपायान्तरं प्रदर्शयता उक्तम्- न सम्प्रसारणे सम्प्रसारणम् इति सूत्रम् अनूच्चार्य सम्प्रसारणाच्च इति सूत्रस्य स्थाने सम्प्रसारणाद् असम्प्रसारणे इति न्यासः उचितः। तेन सम्प्रसारणात् परस्य अचः पूर्वरूपं भवति ततः परं यदि सम्प्रसारणं न स्यात् इति अर्थः पर्यवस्यति। युवन् अस् इति स्थले यकारवकारयोः सम्प्रसारणे इ उ उ अन् इति स्थिते इकारोत्तरस्य उकारस्य पूर्वरूपं न स्यात् वकारस्थानिकस्य उकाररूपसम्प्रसारणस्य परत्वात्। परन्तु उकाररूपसम्प्रसारणात् परम् अकारस्य पूर्वरूपं भवति ततः परं सम्प्रसारणाभावात्। अतः उकारात् परस्य अकारस्य पूर्वरूपे सवर्णदीर्घे इको यणचि इत्याश्रित्य इकारस्य यणादेशे यकारे यूनः इति रूपसिद्धिः। कैयटानुसारम् प्रकल्प्यशब्दस्य सम्पाद्य इत्यर्थं स्वीकृत्य प्रकल्प्य चापवादविषयम् इति परिभाषामाश्रित्य परस्य यणः सम्प्रसारणं विधाय यूनः इति प्रयोगसिद्धौ सम्प्रसारणाश्रयस्य प्रतिषेधः इति भाष्यकारवचनम् असङ्गतम् स्यात्। अतो न कैयटानुसारम् प्रकल्प्य सम्पाद्य इति।

पुनश्च यदि कैयटानुसारम् प्रकल्प्य इत्यस्य सम्पाद्य इत्यर्थः स्यात् तर्हि ततः उत्सर्गः प्रवर्तते इत्यंशस्य असङ्गतिः स्यात्। उत्सर्गस्य प्रवृत्त्यन्तरम् उत्सर्गेण अपवादविषयस्य सम्पादनात् परम् उत्सर्गस्य अप्रवृत्तेः तत्प्रवृत्तिवोधकस्य ततः उत्सर्गः प्रवर्तते इत्यंशस्य व्यर्थत्वमापद्यते।

अत एव उपर्युक्तव्याख्यानेन एतदेव स्पष्टं भवति यत् प्रकल्प्य चापवादविषयम् इति परिभाषाविषये कैयटकथनम् अनुचितम्। अतः प्रकल्प्य इत्यस्य परित्यज्य इति नागेशमतं स्वीकृतम्।

लक्ष्यैकचक्षुष्कजनस्य तु अपवादशास्त्रस्य पर्यालोचनेन प्रयोजनं नास्ति। तत्र अपवादविषयं परित्यज्य लक्ष्यैकचक्षुष्कः उत्सर्गशास्त्रेण लक्ष्यं संस्करोति। हलन्त्यम् , न विभक्तौ तुस्माः इति सूत्रद्वयविषये प्रदर्शितः अन्योन्याश्रयः न स्यादेव।

पूर्वं ह्यपवादा अभिनिविशन्ते पश्चादुत्सर्गाः,प्रकल्प्य चापवादविषयम् ततः उत्सर्गः प्रवर्तते इति परिभाषाद्वयस्य अपवादवाक्यार्थबोधं विना उत्सर्गवाक्यार्थबोधो न भवति इति केषाञ्चिन्मतम् इत्यपि न वाच्यम् यतः आकाङ्क्षादिवाक्यार्थबोधसामग्रीसत्त्वेऽपि यत्र पदार्थोपस्थितिः भवति तत्र उत्सर्गवाक्यार्थबोधः भवत्येव।

नागेशमतानुसारम् प्रकल्प्य चापवादविषयम् ततः उत्सर्गः प्रवर्तते इति परिभाषायाः अपवादशास्त्रविषयम् परित्यज्य उत्सर्गस्य प्रवृत्तिः भवति इत्यर्थः फलति। प्रकृतव्याख्यानुसारम् न विभक्तौ तुस्माः इति सूत्रविषयस्य परित्यागाय न विभक्तौ तुस्माः इत्यस्य वाक्यार्थबोधः आवश्यको भवति। तद्वाक्यार्थबोधानन्तरम् तद्विषयबोधः एवञ्च तत्परिहारो भवति। न विभक्तौ तुस्माः इति सूत्रविषयपरित्यागा-नन्तरम् हलन्त्यम् इत्यस्य प्रवृत्तिः भवति। हलन्त्यम् इत्यस्य प्रवृत्तेः

यदा पकारङ्कारयोः इत्संज्ञानन्तरम् सुप्तिङोः प्रत्याहारसिद्धेर-नन्तरमेव न विभक्तौ तुस्माः इत्यस्य वाक्यार्थबोधात् अन्योन्याश्रयः तदवस्थः।

अन्योन्याश्रयदोषं समाधयन् नागेश आह न विभक्तौ तुस्माः इति सूत्रस्य वाक्यार्थबोधं विनैव सूत्रघटकीभूततुस्मपदार्थतवर्गसकार-मकारबोधेन अवगम्यते यत् तवर्गसकारमकाराणाम् एव इत्त्वनिषेधः अनेन भवति। अतः तवर्गादिभिन्नेषु पकारादिवर्णेषु हलन्त्यम् इति सूत्रस्य प्रवृत्तेः सुप्तिङोः ज्ञानं सुलभम्। तेन विभक्तिपदार्थबोधः अपि सम्भवति। अत एव उत्सर्गवाक्यार्थबोधात् पूर्वम् अपवादवाक्यार्थ-बोधस्य अनपेक्षत्वम् वर्तते एवञ्च न अन्योन्याश्रयदोषः इति भावः।

अत एव उपर्युक्तव्याख्यानेन एतदेव स्पष्टं भवति यत् हलन्त्यम् आदिरन्त्येन सहेता इति सूत्रद्वयस्य मध्ये यः अन्योन्याश्रयदोषः व्याख्यातः तस्य अन्योन्याश्रयदोषस्य निराकरणं तु हलन्त्यम् इति सूत्रस्य आवृत्त्या एव सम्भवति। अत्र प्रथमावृत्ते हलन्त्यम् इति सूत्रे अपि उपदेशपदस्य सम्बन्धो भवति। तेन हल विलेखने इति धातोः लकारस्य इत्संज्ञा न भवति यतः अकारान्तत्वेनैव अस्य उपदेशात्। सूत्रेस्मिन् उपदेशपदस्य सम्बन्धवशादेव हलिति सूत्रेऽन्त्यम् इत् इति अर्थः संगच्छते। अत्र सूत्रे इति पदस्य लाभः उपदेशपदस्य अनुवृत्तेः एव सम्भवति।दीक्षितानुसारम् उपदेशपदम् घञन्तम्, अतः उपदेशशब्द-स्यार्थो भवति आद्योच्चारणम् इति। हल विलेखने इति धातुः हल् इति अन्तिमं माहेश्वरसूत्रम् उभयोरेव आद्योच्चारणत्वसत्त्वेऽपि हल विलेखने इति धातोः उपदेशकाले अदन्तत्वात् हलन्त्यम् इति सूत्रस्य हल् इति सूत्रे एव प्रवृत्तिः। अत्राप्युपदेश इति सम्बध्यते इत्यस्याम् पङ्क्त्याम् अपिशब्देन द्वितीयस्य हलन्त्यम् सूत्रस्यापि ग्रहणं भवति यत्र उपदेशे इति पदस्य सम्बन्धो भवतीति शम् ।

**सन्दर्भग्रन्थसूची**


१. शर्मा तेजःपाल, लघुशब्देन्दुशेखरः, सम्पूर्णानन्दसंस्कृतविश्वविद्या-लयः, वाराणसी,२००२.

२. मिश्र आचार्यविश्वनाथ, लघुशब्देन्दुशेखरः चौखम्बा संस्कृत प्रतिष्ठान, दिल्ली,२०१७

३. जोशी भार्गव शास्त्री, व्याकरण महाभाष्यम्, चौखम्बा संस्कृत प्रतिष्ठान, दिल्ली, २०१४

४. भट्टाचार्य तपनशङ्कर, अष्टाध्यायी, संस्कृत बुक डिपो,कोलकाता, २०१२

५. पाण्डेय रमाकान्त, प्रौढमनोरमा, चौखम्बा विद्याभवन, वाराणसी, २००७

६. नेने पण्डित भूपाल शास्त्री, प्रौढमनोरमा, चौखम्बा संस्कृत संस्थानम्, वाराणसी, २०५१ वैक्रमाब्द.

७. शास्त्री गुरुप्रसाद, शास्त्री सीताराम, शास्त्री बाल, वैयाकरण-सिद्धान्तकौमुदी, चौखम्बा सुरभारती प्रकाशन,वा-राणसी,२०१२


**पाद टिप्पणी**

[1] लघुशब्देन्दुशेखरः(व्याख्याता विश्वनाथमिश्रः,पृष्ठम्२५)

[2] लघुशब्देन्दुशेखरः(व्याख्याता विश्वनाथमिश्रः,पृष्ठम्२५)

[3] लघुशब्देन्दुशेखरः(व्याख्याता विश्वनाथमिश्रः,पृष्ठम्२५)

[4] लघुशब्देन्दुशेखरः(व्याख्याता विश्वनाथमिश्रः,पृष्ठम्२५-२६)

[5] लघुशब्देन्दुशेखरः(व्याख्याता विश्वनाथमिश्रः,पृष्ठम्२८)

[6] लघुशब्देन्दुशेखरः(व्याख्याता विश्वनाथमिश्रः,पृष्ठम्२८)

[7] लघुशब्देन्दुशेखरः(व्याख्याता विश्वनाथमिश्रः,पृष्ठम्२८)

[8] लघुशब्देन्दुशेखरः(व्याख्याता विश्वनाथमिश्रः,पृष्ठम्२८)

[9] लघुशब्देन्दुशेखरः(व्याख्याता विश्वनाथमिश्रः,पृष्ठम्२८)

[10] लघुशब्देन्दुशेखरः(व्याख्याता विश्वनाथमिश्रः,पृष्ठम्३१)

[11] लघुशब्देन्दुशेखरः(व्याख्याता विश्वनाथमिश्रः,पृष्ठम्३२)

[12] लघुशब्देन्दुशेखरः(व्याख्याता विश्वनाथमिश्रः,पृष्ठम्३३)

[13] लघुशब्देन्दुशेखरः(व्याख्याता विश्वनाथमिश्रः,पृष्ठम्३३)

[14] लघुशब्देन्दुशेखरः(व्याख्याता विश्वनाथमिश्रः,पृष्ठम्३५)